# *श्री महालक्ष्मी अष्टकम्*

प्रणम्य शिरसा भक्त्या महालक्ष्मीं कृपानिधीम् |
सर्वसौभाग्यदां शुद्धां सर्वारिष्टनिवारिणीं ||

आदिलक्ष्मीं भाग्यलक्ष्मीं धनलक्ष्मीं तपस्विनीम् |
धान्यलक्ष्मीं बुद्धीलक्ष्मीं महालक्ष्मीं नमाम्यहं ||१||

विद्याल क्ष्मीं मोक्षलक्ष्मीं गृहलक्ष्मीं परमेश्वरीम् |
शांतिलक्ष्मीं धैर्यलक्ष्मीं महालक्ष्मीं नमाम्यहं ||२||

भोगलक्ष्मीं स्वर्णलक्ष्मीं यशोलक्ष्मीं वरप्रदां |
सुखलक्ष्मीं तृप्तिलक्ष्मीं महालक्ष्मीं नमाम्यहं ||३||

मेधालक्ष्मीं मातृलक्ष्मीं शक्तिलक्ष्मीं निरंजनां |
सिद्धलक्ष्मीं तुष्टिलक्ष्मीं महालक्ष्मीं नमाम्यहं ||४||

संपल्लक्ष्मीं शौर्यलक्ष्मीं वीर्यलक्ष्मीं जयप्रदाम् |
मांगल्यलक्ष्मीं श्रीलक्ष्मीं महालक्ष्मीं नमाम्यहं ||५||

अनंतलक्ष्मीं ह्रीलक्ष्मीं ब्रह्मलक्ष्मीं महाद्युतिम् |
आरोग्यलक्ष्मीं धीलक्ष्मीं महालक्ष्मीं नमाम्यहं ||६||

आयुष्यलक्ष्मीं भूलक्ष्मीं पुत्रलक्ष्मीं शुभाप्रदां |
समृद्धलक्ष्मीं हृल्लक्ष्मीं महालक्ष्मीं नमाम्यहं ||७||

भक्तिलक्ष्मीं भुक्तिलक्ष्मीं मुक्तिलक्ष्मीं शमप्रदां |
शास्त्रलक्ष्मीं वेदलक्ष्मीं महालक्ष्मीं नमाम्यहं ||८||

विद्यां बुद्धिं यशो धैर्यं सर्वसंपदमेव च |
महादेव्याः प्रसादेन लभते नात्र संशयः ||

महादेव्यै च विद्महे विष्णु पत्नयै च धीमहि |
तन्नो लक्ष्मीः प्रचोदयात् ||

ॐ शांतिः शांतिः शांतिः ||

# *śrī mahālakṣmī aṣṭakaṃ*

praṇamya śirasā bhaktyā mahālakṣmīṃ kṛpānidhīm |
sarvasaubhāgyadāṃ śuddhāṃ sarvāriṣṭanivāriṇīṃ ||

ādilakṣmīṃ bhāgyalakṣmīṃ dhanalakṣmīṃ tapasvinīm |
dhānyalakṣmīṃ buddhīlakṣmīṃ mahālakṣmīṃ namāmyahaṃ ||1||

vidyāla kṣmīṃ mokṣalakṣmīṃ gṛhalakṣmīṃ parameśvarīm |
śāntilakṣmīṃ dhairyalakṣmīṃ mahālakṣmīṃ namāmyahaṃ ||2||

bhogalakṣmīṃ svarṇalakṣmīṃ yaśolakṣmīṃ varapradāṃ |
sukhalakṣmīṃ tṛptilakṣmīṃ mahālakṣmīṃ namāmyahaṃ ||3||

medhālakṣmīṃ mātṛlakṣmīṃ śaktilakṣmīṃ niranjanāṃ |
siddhalakṣmīṃ tuṣṭilakṣmīṃ mahālakṣmīṃ namāmyahaṃ ||4||

saṃpallakṣmīṃ śauryalakṣmīṃ vīryalakṣmīṃ jayapradām |
māngalyalakṣmīṃ śrīlakṣmīṃ mahālakṣmīṃ namāmyahaṃ ||5||

anantalakṣmīṃ hrīlakṣmīṃ brahmalakṣmīṃ mahādyutim |
ārogyalakṣmīṃ dhīlakṣmīṃ mahālakṣmīṃ namāmyahaṃ ||6||

āyuṣyalakṣmīṃ bhūlakṣmīṃ putralakṣmīṃ śubhāpradāṃ |
samṛddhalakṣmīṃ hṛllakṣmīṃ mahālakṣmīṃ namāmyahaṃ ||7||

bhaktilakṣmīṃ bhuktilakṣmīṃ muktilakṣmīṃ śamapradāṃ |
śāstralakṣmīṃ vedalakṣmīṃ mahālakṣmīṃ namāmyahaṃ ||8||

vidyāṃ buddhiṃ yaśo dhairyaṃ sarvasaṃpadameva ca |
mahādevyāḥ prasādena labhate nātra saṃśayaḥ ||

mahādevyai ca vidmahe viṣṇu patnayai ca dhīmahi |
tanno lakṣmīḥ pracodayāt ||

oṃ śāntiḥ śāntiḥ śāntiḥ ||

# ***श्री अष्ट लक्ष्मी स्तोत्रम्***

## ***आदिलक्ष्मि***

सुमनस वंदित सुंदरि माधवि चंद्र सहॊदरि हेममये
मुनिगण वंदित मोक्षप्रदायनि मंजुल भाषिणि वेदनुते |
पंकजवासिनि देव सुपूजित सद्गुण वर्षिणि शांतियुते
जय जयहे मधुसूदन कामिनि आदिलक्ष्मि परिपालय माम् ||१||

## ***धान्यलक्ष्मि***

अयिकलि कल्मष नाशिनि कामिनि वैदिक रूपिणि वेदमये
क्षीर समुद्भव मंगळ रूपिणि मंत्रनिवासिनि मंत्रनुते |
मंगळदायिनि अंबुजवासिनि देवगणाश्रित पादयुते
जय जयहे मधुसूदन कामिनि धान्यलक्ष्मि परिपालय माम् ||२||

## ***धैर्यलक्ष्मि***

जयवरवर्षिणि वैष्णवि भार्गवि मंत्र स्वरूपिणि मंत्रमये
सुरगण पूजित शीघ्र फ़लप्रद ज्ञान विकासिनि शास्त्रनुते |
भवभयहारिणि पापविमोचनि साधु जनाश्रित पादयुते
जय जयहे मधु सूधन कामिनि धैर्यलक्ष्मी परिपालय माम् ||३||

## ***गजलक्ष्मि***

जय जय दुर्गति नाशिनि कामिनि सर्वफ़लप्रद शास्त्रमये
रधगज तुरगपदाति समावृत परिजन मंडित लोकनुते |
हरिहर ब्रह्म सुपूजित सेवित ताप निवारिणि पादयुते
जय जयहे मधुसूदन कामिनि गजलक्ष्मी रूपेण पालय माम् ||४||

## ***संतानलक्ष्मि***

अयिखग वाहिनि मोहिनि चक्रिणि रागविवर्धिनि ज्ञानमये
गुणगणवारधि लोकहितैषिणि सप्तस्वर भूषित गाननुते |
सकल सुरासुर देव मुनीश्वर मानव वंदित पादयुते
जय जयहे मधुसूदन कामिनि संतानलक्ष्मी परिपालय माम् ||५||

### *विजयलक्ष्मि*

जय कमलासिनि सद्गति दायिनि ज्ञानविकासिनि गानमये
अनुदिन मर्चित कुंकुम धूसर भूषित वासित वाद्यनुते |
कनकधरास्तुति वैभव वंदित शंकरदेशिक मान्यपदे
जय जयहे मधुसूदन कामिनि विजयलक्ष्मी परिपालय माम् ||६||

### *विद्यालक्ष्मि*

प्रणत सुरेश्वरि भारति भार्गवि शोकविनाशिनि रत्नमये
मणिमय भूषित कर्णविभूषण शांति समावृत हास्यमुखे |
नवनिधि दायिनि कलिमलहारिणि कामित फ़लप्रद हस्तयुते
जय जयहे मधुसूदन कामिनि विद्यालक्ष्मी सदा पालय माम् ||७||

### *धनलक्ष्मि*

धिमिधिमि धिंधिमि धिंधिमि-दिंधिमि दुंधुभि नाद सुपूर्णमये
घुमघुम घुंघुम घुंघुम घुंघुम शंख निनाद सुवाद्यनुते |
वेद पूराणेतिहास सुपूजित वैदिक मार्ग प्रदर्शयुते
जय जयहे मधुसूदन कामिनि धनलक्ष्मि रूपेणा पालय माम् ||८||

### *फ़लशृति*

अष्टलक्ष्मी नमस्तुभ्यं वरदे कामरूपिणि |
विष्णुवक्षः स्थला रूढे भक्त मोक्ष प्रदायिनि ||
शंखचक्रगदाहस्ते विश्वरूपिणिते जयः |
जगन्मात्रे च मोहिन्यै मंगळं शुभ मंगळम् ||

# *aṣṭa lakṣmī stotram*

***ādilakṣmi***
sumanasa vandita sundari mādhavi candra sahdari hemamaye
munigaṇa vandita mokṣapradāyani manjula bhāṣiṇi vedanute |
pankajavāsini deva supūjita sadguṇa varṣiṇi śāntiyute
jaya jayahe madhusūdana kāmini ādilakṣmi paripālaya mām ||1||

***dhānyalakṣmi***
ayikali kalmaṣa nāśini kāmini vaidika rūpiṇi vedamaye
kṣīra samudbhava mangala rūpiṇi mantranivāsini mantranute |
mangaladāyini aṃbujavāsini devagaṇāśrita pādayute
jaya jayahe madhusūdana kāmini dhānyalakṣmi paripālaya mām ||2||

***dhairyalakṣmi***
jayavaravarṣiṇi vaiṣṇavi bhārgavi mantra svarūpiṇi mantramaye
suragaṇa pūjita śīghra pha◌laprada jñāna vikāsini śāstranute |
bhavabhayahāriṇi pāpavimocani sādhu janāśrita pādayute
jaya jayahe madhu sūdhana kāmini dhairyalakṣmī paripālaya mām ||3||

***gajalakṣmi***
jaya jaya durgati nāśini kāmini sarvapha◌laprada śāstramaye
radhagaja turagapadāti samāvṛta parijana manḍita lokanute |
harihara brahma supūjita sevita tāpa nivāriṇi pādayute
jaya jayahe madhusūdana kāmini gajalakṣmī rūpeṇa pālaya mām ||4||

***santānalakṣmi***
ayikhaga vāhini mohini cakriṇi rāgavivardhini jñānamaye
guṇagaṇavāradhi lokahitaiṣiṇi saptasvara bhūṣita gānanute |
sakala surāsura deva munīśvara mānava vandita pādayute
jaya jayahe madhusūdana kāmini santānalakṣmī paripālaya mām ||5||

***vijayalakṣmi***
jaya kamalāsini sadgati dāyini jñānavikāsini gānamaye
anudina marcita kunkuma dhūsara bhūṣita vāsita vādyanute |

kanakadharāstuti vaibhava vandita śankaradeśika mānyapade
jaya jayahe madhusūdana kāmini vijayalakṣmī paripālaya mām ||6||

***vidyālakṣmi***
praṇata sureśvari bhārati bhārgavi śokavināśini ratnamaye
maṇimaya bhūṣita karṇavibhūṣaṇa śānti samāvṛta hāsyamukhe |
navanidhi dāyini kalimalahāriṇi kāmita pha◌laprada hastayute
jaya jayahe madhusūdana kāmini vidyālakṣmī sadā pālaya mām ||7||

***dhanalakṣmi***
dhimidhimi dhiṃdhimi dhiṃdhimi-diṃdhimi duṃdhubhi nāda supūrṇamaye
ghumaghuma ghuṃghuma ghuṃghuma ghuṃghuma śankha nināda suvādyanute
|
veda pūrāṇetihāsa supūjita vaidika mārga pradarśayute
jaya jayahe madhusūdana kāmini dhanalakṣmi rūpeṇā pālaya mām ||8||

***phalaśṛti***
aṣṭalakṣmī namastubhyaṃ varade kāmarūpiṇi |
viṣṇuvakṣaḥ sthalā rūḍhe bhakta mokṣa pradāyini ||
śankhacakragadāhaste viśvarūpiṇite jayaḥ |
jaganmātre ca mohinyai mangalaṃ śubha mangalam ||

oṃ śāntiḥ śāntiḥ śāntiḥ ||